# ॐ श्री परमात्मने नमः। अथ पञ्चदशोऽध्यायः । पुरुषोत्तमयोगः ।

| | | | |
|---|---|---|---|
| श्रीभगवानुवाच ।<br>ऊर्ध्वमूलमधःशाखम्<br>छन्दांसि यस्य पर्णानि | अश्वत्थं प्राहुरव्ययम्।<br>यस्तं वेद स वेदवित्॥ १॥ | यतन्तो योगिनश्चैनम्<br>यतन्तोऽप्यकृतात्मानः | पश्यन्त्यात्मन्यवस्थितम्।<br>नैनं पश्यन्त्यचेतसः॥ ११॥ |
| अधश्चोर्ध्वं प्रसृतास्तस्य शाखाः<br>अधश्च मूलान्यनुसन्ततानि | गुणप्रवृद्धा विषयप्रवालाः।<br>कर्मानुबन्धीनि मनुष्यलोके॥ २॥ | यदादित्यगतं तेजः<br>यच्चन्द्रमसि यच्चाग्नौ | जगद्भासयतेऽखिलम्।<br>तत्तेजो विद्धि मामकम्॥ १२॥ |
| न रूपमस्येह तथोपलभ्यते<br>अश्वत्थमेनं सुविरूढमूलम् | नान्तो न चादिर्न च सम्प्रतिष्ठा।<br>असङ्गशस्त्रेण दृढेन छित्त्वा॥ ३॥ | गामाविश्य च भूतानि<br>पुष्णामि चौषधीः सर्वाः | धारयाम्यहमोजसा।<br>सोमो भूत्वा रसात्मकः॥ १३॥ |
| ततः पदं तत्परिमार्गितव्यम्<br>तमेव चाद्यं पुरुषं प्रपद्ये | यस्मिन्गता न निवर्तन्ति भूयः।<br>यतः प्रवृत्तिः प्रसृता पुराणी॥ ४॥ | अहं वैश्वानरो भूत्वा<br>प्राणापानसमायुक्तः | प्राणिनां देहमाश्रितः।<br>पचाम्यन्नं चतुर्विधम्॥ १४॥ |
| निर्मानमोहा जितसङ्गदोषाः<br>द्वन्द्वैर्विमुक्ताः सुखदुःखसंज्ञैः | अध्यात्मनित्या विनिवृत्तकामाः।<br>गच्छन्त्यमूढाः पदमव्ययं तत्॥ ५॥ | सर्वस्य चाहं हृदि संनिविष्टः<br>वेदैश्च सर्वैरहमेव वेद्यः | मत्तः स्मृतिर्ज्ञानमपोहनं च।<br>वेदान्तकृद्वेदविदेव चाहम्॥ १५॥ |
| न तद्भासयते सूर्यः<br>यद्गत्वा न निवर्तन्ते | न शशाङ्को न पावकः।<br>तद्धाम परमं मम॥ ६॥ | द्वाविमौ पुरुषौ लोके<br>क्षरः सर्वाणि भूतानि | क्षरश्चाक्षर एव च।<br>कूटस्थोऽक्षर उच्यते॥ १६॥ |
| ममैवांशो जीवलोके<br>मनःषष्ठानीन्द्रियाणि | जीवभूतः सनातनः।<br>प्रकृतिस्थानि कर्षति॥ ७॥ | उत्तमः पुरुषस्त्वन्यः<br>यो लोकत्रयमाविश्य | परमात्मेत्युदाहृतः।<br>बिभर्त्यव्यय ईश्वरः॥ १७॥ |
| शरीरं यदवाप्नोति<br>गृहीत्वैतानि संयाति | यच्चाप्युत्क्रामतीश्वरः।<br>वायुर्गन्धानिवाशयात्॥ ८॥ | यस्मात्क्षरमतीतोऽहम्<br>अतोऽस्मि लोके वेदे च | अक्षरादपि चोत्तमः।<br>प्रथितः पुरुषोत्तमः॥ १८॥ |
| श्रोत्रं चक्षुःस्पर्शनं च<br>अधिष्ठाय मनश्चायम् | रसनं घ्राणमेव च।<br>विषयानुपसेवते॥ ९॥ | यो मामेवमसंमूढः<br>स सर्वविद्भजति माम् | जानाति पुरुषोत्तमम्।<br>सर्वभावेन भारत॥ १९॥ |
| उत्क्रामन्तं स्थितं वापि<br>विमूढा नानुपश्यन्ति | भुञ्जानं वा गुणान्वितम्।<br>पश्यन्ति ज्ञानचक्षुषः॥ १०॥ | इति गुह्यतमं शास्त्रम्<br>एतद्बुद्ध्वा बुद्धिमान्स्यात् | इदमुक्तं मयानघ।<br>कृतकृत्यश्च भारत॥ २०॥ |

ॐ तत् सत्

इति श्रीमद् भगवद् गीतासु उपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे पुरुषोत्तमयोगो नाम पञ्चदशोऽध्यायः॥

om śrī paramātmane namaḥ. atha pañcadaśo'dhyāyaḥ. puruṣottamayogaḥ.

śrībhagavānuvāca
ūrdhvamūlamadhaḥśākham
aśvatthaṁ prāhuravyayam
chandāṁsi yasya parṇāni
yastaṁ veda sa vedavit 1

adhaścordhvaṁ prasṛtāstasya śākhāḥ
guṇapravṛddhā viṣayapravālāḥ
adhaśca mūlānyanusantatāni
karmānubandhīni manuṣyaloke 2

na rūpamasyeha tathopalabhyate
nānto na cādirna ca sampratiṣṭhā
aśvatthamenaṁ suvirūḍhamūlam
asaṅgaśastreṇa dṛḍhena chittvā 3

tataḥ padaṁ tatparimārgitavyam
yasmingatā na nivartanti bhūyaḥ
tameva cādyaṁ puruṣaṁ prapadye
yataḥ pravṛttiḥ prasṛtā purāṇī 4

nirmānamohā jitasaṅgadoṣāḥ
adhyātmanityā vinivṛttakāmāḥ
dvandvairvimuktāḥ sukhaduḥkhasaṁjñaiḥ
gacchantyamūḍhāḥ padamavyayaṁ tat 5

na tadbhāsayate sūryaḥ
na śaśāṅko na pāvakaḥ
yadgatvā na nivartante
taddhāma paramaṁ mama 6

mamaivāṁśo jīvaloke
jīvabhūtaḥ sanātanaḥ
manaḥṣaṣṭhānīndriyāṇi
prakṛtisthāni karṣati 7

śarīraṁ yadavāpnoti
yaccāpyutkrāmatīśvaraḥ
gṛhītvaitāni saṁyāti
vāyurgandhānivāśayāt 8

śrotraṁ cakṣuḥsparśanaṁ ca
rasanaṁ ghrāṇameva ca
adhiṣṭhāya manaścāyam
viṣayānupasevate 9

utkrāmantaṁ sthitaṁ vāpi
bhuñjānaṁ vā guṇānvitam
vimūḍhā nānupaśyanti
paśyanti jñānacakṣuṣaḥ 10

yatanto yoginaścainam
paśyantyātmanyavasthitam
yatanto'pyakṛtātmānaḥ
nainaṁ paśyantyacetasaḥ 11

yadādityagataṁ tejaḥ
jagadbhāsayate'khilam
yaccandramasi yaccāgnau
tattejo viddhi māmakam 12

gāmāviśya ca bhūtāni
dhārayāmyahamojasā
puṣṇāmi cauṣadhīḥ sarvāḥ
somo bhūtvā rasātmakaḥ 13

ahaṁ vaiśvānaro bhūtvā
prāṇināṁ dehamāśritaḥ
prāṇāpānasamāyuktaḥ
pacāmyannaṁ caturvidham 14

sarvasya cāhaṁ hṛdi saṁniviṣṭaḥ
mattaḥ smṛtirjñānamapohanaṁ ca
vedaiśca sarvairahameva vedyaḥ
vedāntakṛdvedavideva cāham 15

dvāvimau puruṣau loke
kṣaraścākṣara eva ca
kṣaraḥ sarvāṇi bhūtāni
kūṭastho'kṣara ucyate 16

uttamaḥ puruṣastvanyaḥ
paramātmetyudāhṛtaḥ
yo lokatrayamāviśya
bibhartyavyaya īśvaraḥ 17

yasmātkṣaramatīto'ham
akṣarādapi cottamaḥ
ato'smi loke vede ca
prathitaḥ puruṣottamaḥ 18

yo māmevamasaṁmūḍhaḥ
jānāti puruṣottamam
sa sarvavidbhajati mām
sarvabhāvena bhārata 19

iti guhyatamaṁ śāstram
idamuktaṁ mayānagha
etadbuddhvā buddhimānsyāt
kṛtakṛtyaśca bhārata 20

om tat sat
iti śrīmad bhagavad gītāsu upaniṣatsu brahmavidyāyāṁ yogaśāstre śrīkṛṣṇārjunasaṁvāde puruṣottamayogo nāma pañcadaśo'dhyāyaḥ.